# bAlakRitaM kRiShNastotram OR dAvAnala saMharaNa stotram

# શ્રીકૃષ્ણસ્તોત્રં બાલકૃતમ્ અથવા દાવાનલ સંહરણ સ્તોત્રમ્

## Document Information

Text title : bAlakRitaM kRiShNastotram

File name : baalakrishnastotra.itx

Category : vishhnu, krishna, stotra, vishnu

Location : doc_vishhnu

Author : Traditional

Proofread by : Subrahmanyam Gorty subrahmanyam_gorty at yahoo.com

Latest update : May 1, 2003, July 13, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીકૃષ્ણસ્તોત્રં બાલકૃતમ્ અથવા દાવાનલ સંહરણ સ્તોત્રમ્

બાલા ઊચુઃ -
યથા સુરક્ષિત બ્રહ્મન્ સર્વાપત્સ્વેવ નઃ કુલમ્ ।
તથા રક્ષાં કુરુ પુનર્દાવાગ્નેર્મધુસૂદન ॥ ૧॥

ત્વમિષ્ટદેવતાઽસ્માકં ત્વમેવ કુલદેવતા ।
સ્રષ્ટા પાતા ચ સંહર્તા જગતાં ચ જગત્પતે ॥ ૨॥

વહ્નિર્વા વરૂણો વાઽપિ ચન્દ્રો વા સૂર્ય એવ ચ ।
નમઃ કુબેરઃ પવન ઈશાનાદ્યાશ્ચ દેવતા ॥ ૩॥

બ્રહ્મેશ-શેષ-ધર્મેન્દ્રા મુનીન્દ્રા મનવઃ સ્મૃતાઃ ।
માનવાશ્ચ તથા દૈત્યા યક્ષ-રાક્ષસ-કિન્નરાઃ ॥ ૪॥

યે યે ચરાઽચરાશ્ચૈવ સર્વે તવ વિભૂતયઃ ।
આવિર્ભાવસ્તિરોભાવઃ સર્વેષાં ચ તવેચ્છયા ॥ ૫॥

અભયં દેહિ ગોવિંદ વહ્નિસંહરણં કુરુ ।
વયં ત્વાં શરણં યામો રક્ષ નઃ શરણાગતાન્ ॥ ૬॥

ઇત્યેવમુક્ત્વા તે સર્વે તસ્થુર્ધ્યાત્વા પદામ્બુજમ્ ।
દૂરીભૂતસ્તુ દાવાગ્નિઃ શ્રીકૃષ્ણામૃતદૃષ્ટિતઃ ॥ ૭॥

દૂરીભૂતે ચ દાવાગ્નૌ નનૃતુસ્તે મુદાન્વિતાઃ ।
સર્વાપદઃ પ્રણશ્યન્તિ હરિસ્મરણમાત્રતઃ ॥ ૮॥

ઇદં સ્તોત્રં મહાપુણ્યં પ્રાતરુત્થાય યઃ પઠેત્ ।
વહ્નિતો ન ભવેત્તસ્ય ભયં જન્મનિ જન્મનિ ॥ ૯॥

શત્રુગ્રસ્તે ચ દાવાગ્નૌ વિપત્તૌ પ્રાણસંકટે ।
સ્તોત્રમેતત્ પઠિત્વા તુ મુચ્યતે નાઽત્ર સંશયઃ ॥ ૧૦॥

શત્રુસૈન્યં ક્ષયં યાતિ સર્વત્ર વિજયી ભવેત્ ।

ઇહ લોકે હરેર્ભક્તિમન્તે દાસ્યં લભેદ્ધ્રુવમ્ ॥ ૧૧॥

॥ ઇતિ શ્રીબ્રહ્મવૈવર્તે શ્રીકૃષ્ણજન્મખણ્ડે બાલકૃતં
કૃષ્ણસ્તોત્રં અથવા દાવાનલ સંહરણ સ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Subrahmanyam Gorty subrahmanyam_gorty at yahoo.com

*bAlakRitaM kRiShNastotram OR dAvAnala saMharaNa stotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*